नास्ति अस्याः । अच् टाप् च इति केचित् ।) अतिविषा । इति मेदिनी ॥ कपिलद्राक्षा । इति राजनिर्घण्टः ॥

काश्मीरी, स्त्री, (काश्मीरदेशे भवः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् । स्त्रियां ङीप् ।) गम्भारी । इति भावप्रकाशः ॥ (अस्याः पर्य्यायगुणाः काश्मरीशब्दे ज्ञेयाः ॥)

काश्यं, क्ली, (कुत्सितं आश्यं यत्र । कं जलं आश्यं वा यत्र । (मद्यम् । इति राजनिर्घण्टः ॥) नृपविशेषे पुं । यथा महाभारते १ । १०२ । ४९ ।
"अस्त्रतः क्षपयित्वारीन् संख्येऽसंख्येयविक्रमः ।
आनयामास काश्यस्य सुताः सागरगासुतः" ॥)

काश्यपं, क्ली, (काश्यं मद्यं पिबत्यत्र । पा + घञर्थे कः । मांसस्य हि मद्यपानाङ्गत्वेन प्रसिद्धेस्तथात्वम् ।) मांसम् । इति हेमचन्द्रः ॥

काश्यपः, पुं, (कश्यपस्य गोत्रापत्यम् । विदाद्यञ् ।) कणादमुनिः । इति त्रिकाण्डशेषः ॥ मृगभेदः ॥ इति मेदिनी ॥ गोत्रविशेषः । तत्प्रवरान्तर्गतमुनिविशेषः । इति स्मृतिः ॥ कश्यपस्यापत्यमात्रञ्च ॥ (विभाण्डकमुन्यर्थे यथा, महाभारते ३ । ११९ । २० ।
"स्वाध्यायवान् वृत्तसमाधियुक्तो
विभाण्डकः काश्यपः प्रादुरासीत्" ॥ * ॥
स्वनामख्यातो द्विजविशेषः । अयं हि विषविद्यापारदर्शी । अस्य विवरणमुच्यते ।
यदा शमीकपुत्त्रेण शृङ्गिणा 'स कौरवाधमः सप्तमेऽहनि सर्पराजेन तक्षकेन दष्टो यमसदनं गमिष्यतीति' शप्तः परीक्षित्, तदा राज्ञ एतच्छापवृत्तान्तमाकर्ण्यासौ काश्यपो नाम ब्राह्मणः राजानं परीक्षितं तक्षकविषात् रक्षितुं धनार्थी हस्तिनापुरमुद्दिश्य प्रस्थितः । गच्छन्तमेनं पथि तक्षको दृष्टवानाह च को भवान् कुत्र वा गच्छति । अथ तक्षकेनैवमुक्तोऽसौ काश्यपः सर्व्वं निवेदयामास । एवमुक्तवति तु काश्यपे तक्षकस्तस्य विद्याप्रभावं दिदृक्षुः सम्मुखस्थमेकं न्यग्रोधं अदशत् । दष्टो वृक्षस्तु प्रचण्डविषतेजसा क्षणात् प्रजज्वाल । एवम्भूतेऽसौ काश्यपः स्वविद्याप्रभावं विज्ञापयितुकामो न्यग्रोधभस्मकणामादाय तरसा मन्त्रबलेन पुनर्वनस्पतिं जीवयामास । अथ नागराजस्तक्षक एतदालोक्य सविस्मयस्तस्मै प्रभूतधनं दत्त्वा विसर्जयामास । एतद्विवरणन्तु महाभारते १ । ४३ । अध्याये द्रष्टव्यम् ॥)

काश्यपिः, पुं, (कश्यपस्यापत्यं बाह्वादित्वात् इञ् ।) अरुणः । "काश्यपिर्गरुडाग्रजः" । इत्यमरः १ । ३ । ३२ ॥ गरुडः । इति हेमचन्द्रः ॥ (महाभारते १ पर्व्वणि तदोत्पत्तिविवरणम् । यथा,—
"एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्त्रकामा यशस्विनी ॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ॥
आरम्भः सफलो देवि ! भविता यस्त्वयेप्सितः ।
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ।
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा" ॥)

काश्यपी, स्त्री, (कश्यपस्येयं । "तस्येदम्" । ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) पृथिवी । इत्यमरः । २ । १ । २ ॥
("अथागम्य महाराज ! नमस्कृत्य च कश्यपम् ।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः" ॥
इति महाभारते ॥ दानधर्म्मे । १३ । १५४ । ७ ॥ प्रजा । एतद्विषयकप्रमाणं कूर्म्मशब्दे द्रष्टव्यम् ॥)

काश्यपेयः, पुं, (कश्यपस्येयम् । कश्यप + अण् ङीप् च काश्यपी कश्यपपत्नी अदितिः । तत्र भवः इति ढक् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा,
"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्" ॥
इति सूर्य्यप्रणामः ॥ देवमात्रं । कश्यपीसुतत्वात् ॥)

काश्वरी, स्त्री, (काश + वनिप् "वनोरच" । ४ । १ । ७ इति ङीप् रश्च । जातौ ङीष् वा ।) काश्मरी । इति भरतो द्विरूपकोषश्च ॥

काष्ठं, क्ली, (काशते दीप्यते काशत्यनेन वा । काश + "हनिकुषीत्यादिना" उणां । २ । २ । क्थन् । व्रश्चेति षत्वम् तितुत्रेति नेट् ।) दारु । इत्यमरः । २ । ४ । १३ ॥ काठ इति भाषा । (उक्तञ्च ।
"संसारमतिशुष्कं यत् सुषिमध्ये समेष्यति ।
तत्काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्" ॥)

काष्ठकं, क्ली, (काष्ठं सत्कायति । काष्ठ + कै + कः केचित्तु काष्ठं विद्यतेऽस्य नड़ादित्वात् छः कुक् च बिल्वकादित्वात् छमात्रस्य लुक् । प्रशस्तकाष्ठत्वात् अस्य तथात्वं ।) अगुरु । इति राजनिर्घण्टः ॥

काष्ठकदली, स्त्री, (काष्ठवत् कठिना कदली ।) कदलीभेदः । काट्कला इति भाषा । तत्पर्य्यायः । सुकाष्ठा २ वनकदली ३ काष्ठिका ४ शिलारम्भा ५ दारुकदली ६ फलाढ्या ७ वनमोचा ८ अश्मकदली ९ । अस्या गुणाः । रुचिकारित्वम् । रक्तपित्तनाशित्वम् । हिमत्वम् । गुरुत्वम् । मन्दाग्निजनकत्वम् । दुर्ज्जरत्वम् । मधुरत्वम् । हितत्वञ्च । इति राजनिर्घण्टः ॥

काष्ठकीटः, पुं, (काष्ठे जातः कीटः । काष्ठलेखकः कीटो वा ।) घुणः । इति हेमचन्द्रः ॥

काष्ठकुट्टः, पुं, (काष्ठं कुट्टतीति । कुट्ट + अण् ।) पक्षिविशेषः । काठठोकरा इति भाषा । तत्पर्य्यायः । शतच्छदः २ । इति त्रिकाण्डशेषः ॥

काष्ठकुद्दालः, पुं, (कुं मलं उद्दालयति विदारयति निपातनात् साधुः । काष्ठस्य कुद्दालः काष्ठेन निर्म्मितः काष्ठमयः कुद्दालो वा ।) नौकादेर्म्मलापनयनार्थं काष्ठघटितकुद्दालः । तत्पर्य्यायः । अभ्रिः २ । इत्यमरः ॥

काष्ठजम्बूः, स्त्री, (काष्ठप्रधाना जम्बूः ।) भूमिजम्बूः । इति राजनिर्घण्टः ॥

काष्ठतक्षकः, पुं, (काष्ठं तक्षति । काष्ठ + तक्ष + ण्वुल् ।) काष्ठतट् । इति शब्दरत्नावली ॥

काष्ठतट्, [क्ष्] पुं, (काष्ठं तक्षति । तक्षू तनूकरणे क्विप् ।) वर्णसङ्करजातिविशेषः । कुतार इति भाषा । तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४ रथकारः । ५ । इत्यमरः । २ । १० । ९ ॥

काष्ठतन्तुः, पुं, (काष्ठे तन्तुरिव विस्तततयावस्थितत्वात् ।) काष्ठकृमिः । तत्पर्य्यायः । कोषकारः २ । इति हारावली ॥

काष्ठदारुः, पुं, (काष्ठं दारुसंज्ञकं । काष्ठप्रधानो दारुरिति केचित् ।) देवकाष्ठम् । इति राजनिर्घण्टः ॥

काष्ठद्रुः, पुं, (काष्ठप्रधानो द्रुर्वृक्षः ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥

काष्ठधात्रीफलं, क्ली, (काष्ठमिव शुष्कं धात्रीफलम् ।) आमलकम् । इति राजनिर्घण्टः ॥

काष्ठपाटला, स्त्री, (काष्ठवत् कठिना पाटला ।) सितपाटलिका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा । "अपरा स्यात्पाटला सिता । मुष्कको मोक्षको घण्टा पाटलिः काष्ठपाटला" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

काष्ठमठी, स्त्री, (काष्ठरचिता मठीव ।) चिता । इति त्रिकाण्डशेषः ॥

काष्ठमल्लः, पुं, (काष्ठं मल्लः वाहक इव यत्र ।) शवयानम् । इति हारावली ॥

काष्ठलेखकः, पुं, (काष्ठं लिखति । कर्त्तनेन लेखनाकारं करोतीति । लिख + ण्वुल् ।) घुणः । इति हारावली ॥

काष्ठलोही, [न्] पुं, (काष्ठेन युक्तं लोहं विद्यते यत्र । यद्वा काष्ठं च लोहं च ते स्तोऽत्र । इनिः ।) लोहयुक्तमुद्गरः । तत्पर्य्यायः । वातर्हिः २ । इति त्रिकाण्डशेषः ॥

काष्ठवल्लिका, स्त्री, (काष्ठवत् शुष्का वल्लिका ।) कटुका । इति वैद्यकम् ॥ (कट्वीशब्देऽस्या गुणादयो बोद्धव्याः ॥)

काष्ठशारिवा, स्त्री, (काष्ठमिव शुष्का शारिवा ।) शारिवा । इति राजनिर्घण्टः । अनन्तमूल इति भाषा ॥

काष्ठा, स्त्री, (काशते प्रकाशते । काश् दीप्तौ । "हनिकुषिनीरमिकाशिभ्यः क्थन्" । उणां २ । २ । इति क्थन् । व्रश्चेति षत्वं ततः टाप् ।) दिक् । (यथा, माघे ११ । १२ ।
"स्फुरति विशदमेषा पूर्व्वकाष्ठाङ्गनायाः" ॥)
स्थितिः । सीमा । उत्कर्षः । (यथा, कठश्रुतौ ।
"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥
अष्टादशनिमेषात्मककालः । इत्यमरः । १ । ४ । ११ ॥
(यथा मनुः १ । ६४ ।
"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला" ॥
विष्णुपुराणमते पञ्चदशनिमेषात्मकः कालः । यदुक्तं, तत्रैव १ । ३ । ७ ।
"काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम ! ॥)
दारुहरिद्रा । इति मेदिनी ॥ (कश्यपपत्नीभेदः । यथा, भागवते ६ । ६ । २५ ।
"अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला" ॥)

काष्ठाम्बुवाहिनी, स्त्री, (अम्बूनां जलानां वाहिनी